# Sri Ranganatha Ashtottarashatanama Stotram

अस्य श्रीरङ्गनाथ अष्टोत्तरशतनाम स्तोत्रमहामन्त्रस्य वेदव्यासो भगवान् ऋषिः अनुष्टुप् छन्दः भगवान् श्रीमहाविष्णुर्देवता श्रीरङ्गशायीति बीजं श्रीकान्त इति शक्तिः श्रीप्रद इति कीलकं समस्तपापनाशार्थे जपे विनियोगः ॥

धौम्य उवाच

श्रीरङ्गशायी श्रीकान्तः श्रीप्रदः श्रितवत्सलः ।
अनन्तो माधवो जेता जगन्नाथो जगद्गुरुः ॥ १ ॥
सुरवर्यः सुराराध्यः सुरराजानुजः प्रभुः ।
हरिर्हतारिर्विश्वेशः शाश्वतः शम्भुरव्ययः ॥ २ ॥
भक्तार्तिभञ्जनो वाग्मी वीरो विख्यातकीर्तिमान् ।
भास्करः शास्त्रतत्त्वज्ञो दैत्यशास्ताऽमरेश्वरः ॥ ३ ॥
नारायणो नरहरिर्नीरजाक्षो नरप्रियः ।
ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्माङ्गो ब्रह्मपूजितः ॥ ४ ॥
कृष्णः कृतज्ञो गोविन्दो हृषीकेशोऽघनाशनः ।
विष्णुर्जिष्णुर्जितारातिः सज्जनप्रिय ईश्वरः ॥ ५ ॥
त्रिविक्रमस्त्रिलोकेशस्त्रय्यर्थस्त्रिगुणात्मकः ।
काकुस्थः कमलाकान्तः कालियोरगमर्दनः ॥ ६ ॥

कालाम्बुदश्यामलाङ्गः केशवः क्लेशनाशनः ।
केशिप्रभञ्जनः कान्तो नन्दसूनुररिन्दमः ॥ ७ ॥
रुक्मिणीवल्लभः शौरिर्बलभद्रो बलानुजः ।
दामोदरो हृषीकेशो वामनो मधुसूदनः ॥ ८ ॥
पूतः पापजनध्वंसी पुण्यश्लोकशिखामणिः ।
आदिमूर्तिर्दयामूर्तिः शान्तमूर्तिरमूर्तिमान् ॥ ९ ॥
परंब्रह्म परंधाम पावनः पवनो विभुः ।
चन्द्रश्छन्दोमयो रामः संसाराम्बुधितारकः ॥ १० ॥
आदियोऽच्युतो भानुः शङ्करः शिव ऊर्जितः ।
महेश्वरो महायोगी महाशक्तिर्महेश्वरः ॥ ११ ॥
दुर्जनध्वंसकोऽशेषसज्जनोपास्तिसत्फलम् ।
पक्षीन्द्रवाहनोऽक्षोभ्यः क्षीराब्धिशयनो विधुः ॥ १२ ॥
जनार्दनो जगद्धेतुर्जितमन्मथविग्रहः ।
चक्रपाणिः शङ्खधारी शाङ्र्गी खड्गी गदाधरः ॥ १३ ॥

फलश्रुतिः

एवं विष्णोः शतं नाम्नामष्टोत्तरमिहेरितम् ।
स्तोत्राणामुत्तमं गुह्यं नामरत्नस्तवाभिधम् ॥ १४ ॥
सर्वथा सर्वरोगघ्नं चिन्तितार्थफलप्रदम् ।
त्वं तु शीघ्रं महाराज गच्छ रङ्गस्थलं शुभम् ॥ १५ ॥
स्नात्वा तुलार्के कावेर्यां माहात्म्यश्रवणं कुरु ।

गवाश्ववस्त्रधान्यान्नभूमिकन्याप्रदो भव ॥ १६ ॥
द्वादश्यां पायसान्नेन सहस्रं दश भोजय ।
नामरत्नस्तवाख्येन विष्णोरष्टशतेन च ।
स्तुत्वा श्रीरङ्गनाथं त्वमभीष्टफलमाप्नुहि ॥ १७ ॥

asya śrīraṅganātha aṣṭottaraśatanāma stotramahāmantrasya vedavyāso bhagavān ṛṣiḥ anuṣṭup chandaḥ bhagavān śrīmahāviṣṇurdevatā śrīraṅgaśāyīti bījaṃ śrīkānta iti śaktiḥ śrīprada iti kīlakaṃ samastapāpanāśārthe jape viniyogaḥ ||

dhaumya uvāca
śrīraṅgaśāyī śrīkāntaḥ śrīpradaḥ śritavatsalaḥ |
ananto mādhavo jetā jagannātho jagadguruḥ || 1 ||
suravaryaḥ surārādhyaḥ surarājānujaḥ prabhuḥ |
harirhatārirviśveśaḥ śāśvataḥ śambhuravyayaḥ || 2 ||
bhaktārtibhanjano vāgmī vīro vikhyātakīrtimān |
bhāskaraḥ śāstratattvajno daityaśāstā.amareśvaraḥ || 3 ||
nārāyaṇo naraharirnīrajākṣo narapriyaḥ |
brahmaṇyo brahmakṛd brahmā brahmāṅgo brahmapūjitaḥ || 4 ||
kṛṣṇaḥ kṛtajno govindo hṛṣīkeśo.aghanāśanaḥ |
viṣṇurjiṣṇurjitārātiḥ sajjanapriya īśvaraḥ || 5 ||
trivikramastrilokeśastrayyarthastriguṇātmakaḥ |
kākusthaḥ kamalākāntaḥ kāliyoragamardanaḥ || 6 ||
kālāmbudaśyāmalāṅgaḥ keśavaḥ kleśanāśanaḥ |
keśiprabhanjanaḥ kānto nandasūnurarindamaḥ || 7 ||
rukmiṇīvallabhaḥ śaurirbalabhadro balānujaḥ |
dāmodaro hṛṣīkeśo vāmano madhusūdanaḥ || 8 ||

pūtaḥ pāpajanadhvaṃsī puṇyaślokaśikhāmaṇiḥ |
ādimūrtirdayāmūrtiḥ śāntamūrtiramūrtimān || 9 ||
paraṃbrahma paraṃdhāma pāvanaḥ pavano vibhuḥ |
candraśchandomayo rāmaḥ saṃsārāmbudhitārakaḥ || 10 ||
ādiyo.acyuto bhānuḥ śaṅkaraḥ śiva ūrjitaḥ |
maheśvaro mahāyogī mahāśaktirmaheśvaraḥ || 11 ||
durjanadhvaṃsako.aśeṣasajjanopāstisatphalam |
pakṣīndravāhano.akṣobhyaḥ kṣīrābdhiśayano vidhuḥ || 12 ||
janārdano jagaddheturjitamanmathavigrahaḥ |
cakrapāṇiḥ śaṅkhadhārī śārṅgī khaḍgī gadādharaḥ || 13 ||

phalaśrutiḥ
evaṃ viṣṇoḥ śataṃ nāmnāmaṣṭottaramiheritam |
stotrāṇāmuttamaṃ guhyaṃ nāmaratnastavābhidham || 14 ||
sarvathā sarvarogaghnaṃ cintitārthaphalapradam |
tvaṃ tu śīghraṃ mahārāja gaccha raṅgasthalaṃ śubham || 15 ||
snātvā tulārke kāveryāṃ māhātmyaśravaṇaṃ kuru |
gavāśvavastradhānyānnabhūmikanyāprado bhava || 16 ||
dvādaśyāṃ pāyasānnena sahasraṃ daśa bhojaya |
nāmaratnastavākhyena viṣṇoraṣṭaśatena ca |
stutvā śrīraṅganāthaṃ tvamabhīṣṭaphalamāpnuhi || 17 ||

www.kamakotimandali.com